# ॥गुरमरुत्पुराधीशस्तोत्रम्॥

(Composed by Palakkulam Thrivikraman Namputhiri)

गरुडवाहनं पुण्यदर्शनं
वरझषाकृतिं वेदसंग्रहम् ।
प्रलयकालजीवात्मतारकं
गुरुमरुत्पुराधीशमाश्रये ॥१

प्रणवमानसं प्राणजीवनं
प्रकटकच्छपाकारमीश्वरम् ।
अमृतदायकं नित्यनूतनं
गुरुमरुत्पुराधीशमाश्रये ॥२

सुकृतकल्पकं सामतोषितं
सकलवैष्णवाकारसूकरम् ।
भुवनभूषणालंकृतं विभुं
गुरुमरुत्पुराधीशमाश्रये ॥३

वरदमीश्वरं नारसिंहकं
वपुषि भीकरं पुण्यपूरकम् ।
सुरगणावृतं भक्तवत्सलं
गुरुमरुत्पुराधीशमाश्रये ॥४

चरितविश्रुतं वामनाकृतिं
परमपूरुषं यागसाधकम् ।
परपदप्रदं पापनाशकं
गुरुमरुत्पुराधीशमाश्रये ॥५

भृगुकुलोद्भवं रामनामकं
सुगुणभासुरं रेणुकात्मजम् ।
नृवरतापसं केरळाधिपं
गुरुमरुत्पुराधीशमाश्रये ॥६

दशरथात्मजं रामभद्रकं
शरधनुर्धरं रावणान्तकम् ।
पुरुषमव्ययं श्रीनिकेतनं
गुरुमरुत्पुराधीशमाश्रये ॥७
वरहलायुधं रोहिणीसुतं
गिरिधराग्रजं रामदैवतम् ।
गजगणप्रियं धीमतां वरं
गुरुमरुत्पुराधीशमाश्रये ॥८
धृतसुदर्शनं कृष्णमच्युतं
विजयसारथिं गीतसारसम् ।
पशुपगोपिकानर्तनप्रियं
गुरुमरुत्पुराधीशमाश्रये ॥९
दशविधाकृतिं कल्किवैभवं
भुजगतल्पगं भूतभावनम् ।
निखिलरोगसंहारकारकं
गुरुमरुत्पुराधीशमाश्रये ॥१०

दशककीर्तनं श्रीधरात्मकं
पदमनामयं ईश्वरार्पितम् ।
परममङ्गळं भाग्यदायकं
गुरुमरुत्पुराधीशमाश्रये ११